# ॥ श्रीमीनाक्षी नवरत्नमाला ॥

This is a composition of Asthana Vidwan Brahmasri K P Shankara Shastrigal. This hymn was incorrectly attributed to H H Sri Sacchidananda Sivabhinava Nrsimha Bharati Swamigal in one of the issues of Sankara Kripa and later a correction was published.

गौरीं काञ्चनपद्मिनीतटगृहां श्रीसुन्दरेशप्रियाम्

नीपारण्यसुवर्णकन्दुकपरिक्रीडाविलोलामुमाम् ।

श्रीमत्पाण्ड्यकुलाचलाग्रविलसद्रत्नप्रदीपायिताम्

मीनाक्षीं मधुरेश्वरीं शुकधरां श्रीपाण्ड्यबालां भजे ॥१ ॥

गौरीं वेदकदम्बकाननशुकीं शास्त्राटवीकेकिनीम्

वेदान्ताखिलधर्महेमनलिनीहंसीं शिवां शाम्भवीम् ।

ॐकाराम्बुजनीलमत्तमधुपां मन्त्राम्रशाखापिकाम्

मीनाक्षीं मधुरेश्वरीं शुकधरां श्रीपाण्ड्यबालां भजे ॥२ ॥

गौरीं नूपुरशोभितांघ्रिकमलां तूणोल्लसज्जंघिकाम्

रत्नादर्शसमानजानुयुगलां रम्भानिभोरूज्ज्वलाम् ।

काञ्चीबद्धमनोज्ञपीनजघनामावर्तनाभिहृदाम्

मीनाक्षीं मधुरेश्वरीं शुकधरां श्रीपाण्ड्यबालां भजे ॥३ ॥

गौरीं व्योमसमानमध्यमधृतामुत्तुङ्गवक्षोरुहाम्
वीणामञ्जुलशारिकान्वितकरां शंखाभकण्ठोज्ज्वलाम् ।
राकाचन्द्रसमानचारुवदनां लोलम्बनीलालकाम्
मीनाक्षीं मधुरेश्वरीं शुकधरां श्रीपाण्ड्यबालां भजे ॥४ ॥

गौरीं कुङ्कुमपङ्कलेपितलसद्वक्षोजकुम्भोज्ज्वलाम्
कस्तूरीतिलकालिकां मलयजोल्लेपोल्लसत्कन्धराम् ।
लाक्षाकर्दमशोभिपादयुगलां सिन्दूरसीमन्तिनीम्
मीनाक्षीं मधुरेश्वरीं शुकधरां श्रीपाण्ड्यबालां भजे ॥५ ॥

गौरीं मञ्जुलमीननेत्रयुगलां कोदण्डसुभ्रूलताम्
बिम्बोष्ठीं जितकुन्ददन्तरुचिरां चाम्पेयनासोज्ज्वलाम् ।
अर्धेन्दुप्रतिबिम्बफालरुचिरामादर्शगण्डस्थलाम्
मीनाक्षीं मधुरेश्वरीं शुकधरां श्रीपाण्ड्यबालां भजे ॥६ ॥

गौरीं काञ्चनकङ्कणाङ्गदधरां नासोल्लसन्मौक्तिकाम्
काञ्चीहारकिरीटकुण्डलशिरोमाणिक्यभूषोज्ज्वलाम् ।
मञ्जीरांगुलिमुद्रिकांघ्रिकटकग्रैवेयकालङ्कृताम्
मीनाक्षीं मधुरेश्वरीं शुकधरां श्रीपाण्ड्यबालां भजे ॥७ ॥

गौरीं चम्पकमल्लिकादिकुसुमैः पुन्नागसौगन्धिकैः
द्रोणेन्दीवरकुन्दजातिवकुलैराबद्धचूलीयुताम् ।
मन्दारारुणपुष्पकैतकदलश्रेणीलसद्वेणिकाम्
मीनाक्षीं मधुरेश्वरीं शुकधरां श्रीपाण्ड्यबालां भजे ॥८ ॥

गौरीं दाडिमपुष्पवर्णविलसद्दिव्याम्बरालङ्कृताम्
चन्द्रांशूपमचारुचामरकरश्रीभारतीसेविताम् ।
नानारत्नसुवर्णदण्डविलसन्मुक्तातपत्रोज्ज्वलाम्
मीनाक्षीं मधुरेश्वरीं शुकधरां श्रीपाण्ड्यबालां भजे ॥९ ॥

वाचा वा मनसाऽपि वा गिरिसुते कायेन वा सन्ततम्
मीनाक्षीति कदाचिदम्ब कुरुते त्वनामसंकीर्तनम् ।
लक्ष्मीस्तस्य गृहे वसत्यनुदिनं वाणी च वक्त्राम्बुजे
धर्मादीष्टचतुष्टयं करतले प्राप्तं भवेन्निश्चयः ॥१० ॥

Sri Kamakoti Mandali [srigurupaduka@yahoo.com]